गोविंद गोपवनिताव्रजभृत्यगीत
तीर्थश्रवः श्रवणमंगल पाहि भृत्यान् ॥२५६॥

इति श्रीभागवतसारसमुच्चये वैश्वानरोक्तं पुरुषोत्तम-
नाम्नां सहस्रं संपूर्णम् ॥शुभमस्तु ॥

## ॥ अथ यमुनाष्टकम् ॥

श्रीगोपीजनवल्लभाय नमः ॥

नमामि यमुनामहं सकलसिद्धिहेतुं मुदा,
मुरारिपदपंकजस्फुरदमंदरेणूत्कटाम् ।
तटस्थनवकाननप्रकटमोदपुष्पांबुना,
सुरासुरसुपूजितस्मरपितुः श्रियं बिभ्रतीम् ॥१॥

कलिंदगिरिमस्तके पतदमंद पूरोज्ज्वला,
विलासगमनोल्लसत्प्रकटगंडशैलोन्नता ।
सघोषगतिदंतुरा समधिरूढदोलोत्तमा,
मुकुंदरतिवर्धिनी जयति पद्मबंधोः सुता ॥ २ ॥

भुवं भुवनपावनीमधिगतामनेकस्वनैः,
प्रियाभिरिव सेवितां शुकमयूरहंसादिभिः ।
तरङ्गभुजकंकणप्रकटमुक्तिकावालुकां,
नितंबतटसुंदरीं नमत कृष्णतुर्यप्रियाम् ॥ ३ ॥

अनंतगुणभूषिते शिवविरंचिदेवस्तुते,
घनाघननिभेसदा ध्रुवपराशराभीष्टदे ।
विशुद्धमथुरातटे सकलगोपगोपीवृते,
कृपाजलधिसंश्रिते मम मनःसुखं भावय ॥ ४ ॥

यया चरणपद्मजा मुररिपोः प्रियंभावुका,
समागमनतो भवत्सकलसिद्धिदा सेवताम् ।
तया सदृशतामियात्कमलजासपत्नीव यद् ,
धरिप्रियकलिंदया मनसि मे सदा स्थीयताम् ॥५॥

नमोऽस्तु यमुने सदा तव चरित्रमत्यद्भुतं,
न जातु यमयातना भवति ते पयः पानतः ।
यमोऽपि भगिनीसुतान्कथमुहन्ति दुष्टानपि,
प्रियो भवति सेवनात्तव हरेर्यथा गोपिकाः ॥ ६ ॥

ममास्तु तव सन्निधौ तनुनवत्वमेतावता,
न दुर्लभतमा रतिर्मुररिपो मुकुंदप्रिये ।
अतोऽस्तु तव लालना सुरधुनी परं संगमात् ,
तवैव भुवि कीर्तिता न तु कदापि पुष्टिस्थितैः ॥ ७ ॥

स्तुतिं तव करोति कः कमलजासपत्नि प्रिये,
हरेर्यदनुसेवया भवति सौख्यमामोक्षतः ।
इयं तव कथाधिका सकलगोपिकासंगम,
स्मरश्रमजलाणुभिः सकलगात्रजैः संगमः ॥ ८ ॥

तवाष्टकमिदं मुदा पठति सूरसूते सदा,
समस्तदुरितक्षयोभवति वै मुकुंदे रतिः ।
तया सकलसिद्धयो मुररिपुश्च संतुष्यति,
स्वभावविजयो भवेद्वदतिवल्लभः श्रीहरेः ॥ ९ ॥

इति श्रीवल्लभाचार्यविरचितं श्रीयमुनाष्टकस्तोत्रं संपूर्णम् ।

## ॥ अथ बालबोधः ॥

श्री कृष्णाय नमः ॥

नत्वा हरिं सदानंदं सर्वसिद्धान्तविग्रहम् ।
बालप्रबोधनार्थाय वदामि सुविनिश्चितम् ॥ १ ॥

धर्मार्थकाममोक्षाख्याश्चत्वारोऽर्था मनीषिणाम् ।
जीवेश्वरविचारेण द्विधा ते हि विचारिताः ॥ २ ॥

अलौकिकास्तु वेदोक्ताः साध्यसाधनसंयुता ।
लौकिकाऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षया ॥ ३ ॥

लौकिकांस्तुप्रवक्ष्यामि वेदादाद्या यतः स्थिताः ।
धर्मशास्त्राणि नीतिश्च कामशास्त्राणि च क्रमात् ॥ ४ ॥

त्रिवर्गसाधकानीति न तन्निर्णय उच्यते ।
मोक्षे चत्वारि शास्त्राणि लौकिके परतः स्वतः ॥५॥